कान्तायाम् अमरः। तस्याः सर्वत्र तिक्तत्वात् तथात्वम्

**तिक्तगुञ्जा** स्त्री गुञ्जेव तिक्ता राजदन्ता०। करञ्जे हारा०

**तिक्तघृत** न० सुश्रुतोक्ते घृतभेदे तत्पाकविधिस्तत्रोक्तो यथा "त्रिफलापटोलपिचुमर्द्दाटरूषककटुरोहिणीदुरालभात्राय माणापर्पटकास्त्वेतेषां द्विपलिकान् भागान् जलद्रोणे प्रक्षिप्य पादावशेषं कषायमादाय कल्कपेष्याणीमानि भेषजान्यर्द्ध पलिकानि त्रायमाणामुस्तेन्द्रयवचन्दनकिराततिक्तानि पिप्पल्यश्चैतानि घृतप्रस्थे समावाप्य विपचेदेतत्तिक्तकं नाम सर्पिः कुष्ठविषमज्वरगुल्मार्शो-ग्रहणीदोषशोफपाण्डुरोगविसर्पपाण्डत्वशमनं चेति।

"लङ्घनात् लङ्घनाद्यपतर्पणान्ते प्रातस्तयोस्तिक्त-घृतं प्रशस्तम्" सुश्रु०। तिक्तसर्पिरादयोऽप्यत्र न०।

**तिक्ततण्डुला** स्त्री तिक्तस्तण्डुलोऽन्तःशस्यं यस्याः। पिप्पल्याम् राजनि०।

**तिक्ततुण्डी** स्त्री कर्म०। कटुतुम्बीलतायां राजनि०।

**तिक्ततुम्बी** स्त्री कर्म०। कटुतुम्ब्याम् (तितलाउ) रत्नमा०।

**तिक्तदुग्धा** स्त्री तिक्तं दुग्धं निर्यासो यस्याः। १क्षीरिण्याम्, राजनि०। २स्वर्णक्षीर्य्याम् जटा०।

**तिक्तधातु** पु० कर्म०। पित्ते धातौ राजनि०।

**तिक्तपत्र** पु० तिक्तं पत्रमस्य। (काकरोल) १कर्कोटके। २तिक्तपत्रके द्रव्यमात्रे त्रि० कर्म०। ३तिक्ते पत्रे न०।

**तिक्तपर्वन्** स्त्री तिक्तं पर्व ग्रन्थिर्यस्याः। १ग्रन्थिदूर्वायाम् जटा०।२हिलमोच्यां ३गुडूच्यां ४यष्टिमधुलतायाञ्च मेदि०।

**तिक्तपुष्पा** स्त्री तिक्तानि पुष्पाण्यस्याः। (आकनादी) १पाठायाम् राजनि०। २तिक्तपुष्पके द्रव्यमात्रे त्रि०। कर्म०। ३तिक्ते पुष्पे न०।

**तिक्तफल** पु० तिक्तानि फलानि अस्य। १कतकवृक्षे (निर्माल्य) राजनि०। २यवतिक्तायां शब्दार्थचि० ३तिक्तफलके द्रव्यमात्रे त्रि०। ४ वार्त्ताक्यां ५षड्भुजायाञ्च स्त्री टाप् राजनि०। कर्म०। ६तिक्ते फले न०।

**तिक्तभद्रक** पु० भद्रं करोति णिच्—ण्वुल् तिक्तोऽपि भद्रकः कर्म०। पटोले शब्दच०।

**तिक्तमरिच** पु० तिक्तः मरिच इव। कतकवृक्षे राजनि०।

**तिक्तयवा** स्त्री तिक्तः यव इन्द्रयवरसोऽस्यत्र अच्। शङ्खिन्यां पारस्करग्टह्यम्।

**तिक्तरोहिणी** स्त्री तिक्ता सती रोहति रुह—णिनि कर्म०। कटुकायाम्(कटकी) स्वार्थे क ह्रस्वः। तिक्तरोहिणिका। तत्रार्थे राजनि०।

**तिक्तवल्ली** स्त्री कर्म०। १मूर्वालतायाम् रत्नमा०। २तिक्तलतामात्रे च।

**तिक्तवीजा** स्त्री तिक्तानि वीजानि यस्याः। १कटुतुम्ब्याम् राजनि०। २तिक्तवीजके द्रव्यमात्रे त्रि०। कर्म०। ३तिक्ते वीजे न०।

**तिक्तशाक** पु० तिक्तः शाकोऽस्य। १वरुणद्रुमे, २खदिरवृक्षे ३पत्रसुन्दरवृक्षे च मेदि०। कर्म०। ४तिक्ते शाके न०।

**तिक्तसार** पु० तिक्तः सारो निर्यासोऽस्य। १खदिरे रत्नमा०। २दीर्घरोहिषतृणे न० रत्नमा०। ३तिक्तसारके द्रव्यमात्रे त्रि०। कर्म०। ४तिक्ते सारे अस्त्री।

**तिक्ता** स्त्री तिक्तो रसोऽस्त्यस्य अच्। १कटुरोहिण्यां मेदि० २पाठायां रत्नमा० ३यवतिक्तालतायां ४षड्भुजायां राजनि० ५छिक्कन्यां भावप्र०।

**तिक्ताख्या** स्त्री तिक्तेति आख्या यस्याः। कटुतुम्ब्यां राजनि० तिक्ताख्येत्यत्र। [याम् राजनि०।

**तिक्ताङ्गा** स्त्री तिक्तमङ्गमस्त्यस्य अच्। पातालगरुडीलता-

**तिक्तिका** स्त्री तिक्ता स्वार्थे संज्ञायां वाक ह्रस्वे अत इत्त्वम्। कटुतुम्ब्याम् शब्दार्थचि०।

**तिग** हिंसायाम् आस्कन्दे च भ्वा०पर०सक० सेट्। तिग्नोति अतेगीत्। तितेग। "अग्निं जेभ्यैस्तिगितैरर्चि" ऋ० १।१४३।५। "तिगितैर्निशितैः" भा०।

**तिग्म** न०तिज—मक् जस्य गः। १तीक्ष्णे स्पर्शे २तद्वति त्रि०। अमरः। ३ वज्रे निघण्टुः। "तिग्मवीर्य्य विषाद्योते दन्दशूका महाबलाः" भा० आ० २० अ०।

**तिग्मकर** पु० तिग्मः करः किरणो राजग्राह्यो वाऽस्य। २सूर्य्ये त्रिका०। ३उग्रराजग्राह्यके नृपे च। कर्म०। ४तिग्मे करे पु०।

**तिग्मदीधिति** पु० तिग्मा दीधितिरस्य। तिग्मांशौ सूर्य्ये।

**तिग्ममन्यु** त्रि० तिग्मो मन्युरस्य। १उग्रक्रोधके। २शिवे पु० "अहस्परो नक्तचरस्तिग्ममन्युः सुवर्चसः"भा० अनु०१७अ०।

**तिग्मरश्मि** पु० तिग्मारश्मयोऽस्य। १सूर्य्ये। २खररश्मिके त्रि०। कर्म०। ३खरे रश्मौ पु०।

**तिग्मांशु** पु० तिग्मा अंशवो यस्य। १सूर्य्ये जटाधरः "तिग्मांशुरस्तंगतः" जयदेव०। "तिग्मांशुरश्मिच्छ रितान्यदूरात्" भट्टिः। २खरकिरणके त्रि०। कर्म०। ३खरे किरणे पु०। [तितेघ।

**तिघ** घातने स्वा० पर० सक० सेट्। तिघ्नोति अतेघीत्।